# 'मनोगतम् [०२.१७] 'मनकीबात' प्रसारण-तिथि: २५-ओक्टो'२०२०

[भाषान्तरं – डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः! अद्य विजयादशमी अर्थात् दशहरापर्व वर्तते| अस्मिन् पावनावसरे भवद्भ्यः सर्वेभ्यः भूयस्यः शुभकामनाः | दशहरापर्वमिदम्, असत्योपरि सत्यस्य विजयस्य पर्व | परञ्च, युगपदेव, इदं सङ्कटोपरि धैर्यस्य विजयस्यापि पर्वास्ति | साम्प्रतं, भवन्तः सर्वे सुबहु संयमपुरस्सरं जीवन्ति, मर्यादायां स्थित्वा, पर्वोत्सवान् आयोजयन्ति, अत एव, यत् युद्धं वयं युध्यामहे, तस्मिन् विजयोऽपि सुनिश्चितः | पूर्वं, दुर्गा-मण्डपेषु, मातुः पराम्बायाः दर्शनार्थं तावान् जन-सम्मर्दः भवति स्म - यत् प्रकामं मेलकमिव परिदृश्यं प्रतीयते स्म, परञ्च ऐषमः क्रमे, एतादृशं नैवाजायत | पूर्वं, दशहरा-पर्वणि अपि बृहन्ति मेलकानि आयोज्यन्ते स्म, किञ्च ऐषमः क्रमे, तेषां स्वरूपमपि पृथगेवास्ति | रामलीलायाः उत्सवोऽपि, एतस्य अतितराम् आकर्षण - मासीत्, परञ्च अत्रापि कानिचन नियन्त्राणि सन्त्येव | पूर्वं, नवरात्रावसरे, गुजरातस्य गरबा-गुञ्जनं सर्वत्रापि बाहुल्येन श्रूयते स्म, साम्प्रतं, बृहन्ति सर्वाणि आयोजनानि पिहितानि सन्ति | इतः परम् अग्रेऽपि, अपराणि पर्वाणि आगम्यमानानि सन्ति | ईद्-शरदपूर्णिमा-वाल्मीकिजयन्ती-धनतेरस-दीपावलि-भ्रातृद्वितीया-सूर्यषष्ठी-गुरुनानकदेव-जयन्ती-प्रभृतयः | कोरोना-संक्रमणस्य सङ्कटकालेऽस्मिन्, वयं संयमेन एव व्यवहरेम, मर्यादानुसारञ्च वर्तेमहि |

सखायः, यदा वयं पर्वणां वृत्तानि कथयामः, तद्विषयिणीं सज्जाञ्च कुर्मः, तदा सर्वप्रथमं मनसि इदमेव चिन्त्यते यत् विपणीं कदा गन्तव्यमिति? किं किं च क्रेतव्यम्? विशेषेण, बालेषु तु एतदर्थं विशिष्टोत्साहः भवति - पर्वणि साम्प्रतं, किं नवीनं लप्स्यते? उत्सवानाम् अयम् उत्साहः, विपण्याः च दीप्तिः,

अन्योन्यं सम्पृक्तं वर्तते |परञ्च अस्मिन् क्रमे यदा भवन्तः क्रयणार्थं गच्छेयुः तदा 'Vocal for Local'- इत्यस्य स्वीयं सङ्कल्पं अवश्यं स्मरेयुः | विपणीतः सामग्र्याः क्रयणावसरे, अस्माभिः,स्थानीयोत्पादेभ्यः प्राथमिकता नूनं प्रदेया |

सखायः, उत्सवानां पर्वणाञ्च अस्य हर्षोल्लासस्य मध्ये Lockdown-इति सञ्चाररोधस्य कालोऽपि स्मरणीयः | सञ्चाररोधावसरे, वयं समाजस्य तान् सखीन् घनिष्ठतया अवागच्छन्, येषां विना, अस्माकं जीवनम्, अतितरां कठिनं सम्भवेत् - स्वच्छताकर्मिणः, गृहे कार्यरताः भ्रातरः भगिन्यश्च, स्थानिकाः शाक-विक्रेतारः, दुग्ध-वितरकाः, सुरक्षा-कर्मिणः - चैतेषां सर्वेषाम् अस्माकं जीवने का नाम भूमिका, वयमिदं साम्प्रतं सम्यक्तया अनुभूतवन्तः |दुष्करेऽस्मिन् काले, एते भवद्भिः साकमेव आसन्, अस्माभिः सर्वैः सार्धम् आसन् | सम्प्रति, अस्मदीयेषु पर्वसु, स्वीयासु प्रसन्नतासु चापि, एतैः सहैव अस्माभिः वर्तितव्यमस्ति | मदीयोऽयम् आग्रहः- यथासम्भवम् एतान् स्वीय-प्रमोदावसरेषु अवश्यं संयोजयेयुः | कुटुम्ब-सदस्यान् इव व्यवहरेयुः, तदनन्तरम् अवलोकयन्तु, भवतां प्रसन्नता कियती विवर्धते?

सखायः, अस्माभिः स्वीयाः पराक्रमिणः सैनिकाः अपि स्मरणीयाः, ये हि एतेषु पर्वसु अपि सीमासु सन्तिष्ठन्ते| भारत-मातुः सेवां सुरक्षाञ्च कुर्वन्ति | तान् स्मृत्वैव अस्माभिः स्वीय-पर्वाणि आयोजनीयानि |भारतमातुः एतेषां वीर-पुत्रीपुत्राणां सम्मानार्थमपि अस्माभिः गृहे दीपः प्रज्वालनीयः | अहं, स्वीयान् वीर-सैनिकान् अपि वक्तुमिच्छामि यत् भवन्तः भवन्तु नाम सीमोपरि, परञ्च अशेष-देशः भवद्भिः साकमेवास्ति, भवतां कृते च शुभं कामयते |अहं, तेषां कुटुम्बानां त्यागायापि प्रणमामि, येषां सुताः सुताश्च अद्य सीम्नि सन्तिष्ठन्ते | प्रत्येकमपि जनः यः देशेन सम्बद्धस्य कस्यचिदपि दायित्वस्य कारणात् निजगृहे नैव वर्तते, स्वीय-कुटुम्बात् दूरेऽस्ति – अहं, हृदयेन तस्य आभारं प्रकटयामि |

मम प्रियाः देशवासिनः, अद्य वयं यदा स्थानिकोत्पादानां कृते सबलं व्याहरामः, तदा विश्वमपि अस्मदीयान् स्थानिकोत्पादान् सुबहु प्रशंसते । अस्माकम् अनेके स्थानिकोत्पादाः वैश्विकाः भवितुं सुतरां बृहतीं शक्तिं सन्धारयन्ति । यथैकम् उदाहरणमस्ति खादि-वस्त्राणाम् । सुदीर्घकालं यावत् खादि-वस्त्राणि, सरलतायाः अभिज्ञानमासीत्, परन्तु, अस्माकं खादिवस्त्रम् सम्प्रति पर्यावरणानुकूलं वस्त्रमिति अभिज्ञायते । स्वास्थ्यदृष्ट्या एतत् शरीरानुकूलं वस्त्रम्, सर्व-ऋतु-सुखावहञ्च वस्त्रम्, तथा चाद्यत्वे खादिवस्त्राणि तु भूषाचारस्य अभिव्यक्ति-रूपेण प्रवर्तन्ते एव । खादिवस्त्राणां लोकप्रियता तु प्रवर्धते एव, युगपदेव, जगति नैकत्र, खादिवस्त्राणि निर्मीयन्ते अपि । मेक्सिको-देशे अन्यतमं स्थानमस्ति 'ओहाका (Oaxaca)', अस्मिन् क्षेत्रे अनेके ग्रामाः एतादृशाः सन्ति, यत्र स्थानिकाः ग्रामीणाः, खादि-वयनं कुर्वन्ति । सम्प्रति, अत्रत्यं खादिवस्त्रं 'ओहाका-खादि' - रूपेण प्रसिद्धमस्ति । ओहाका-स्थले खादिवस्त्रं केन प्रकारेण आगतमिति विषयः अतितरां रुचिकरः वर्तते। वस्तुतस्तु, मेक्सिको-देशीयः अन्यतमः युवा 'Mark Brown' एकदा महात्म-गान्धिनः चलचित्रमेकम् अपश्यत् । ब्राउनः चलचित्रमिदं दृष्ट्वा बापू-महोदयेन तावान् प्रभावितः यदसौ भारते बापूवर्यस्य आश्रमम् आगतः, तथा च, बापू-विषये समधिक-गहनतया अवगतवान्, ज्ञातवान् च । तदा ब्राउनः अनुभूतवान् यत् खादि केवलं वस्त्रमेव नास्ति परञ्च इयन्तु एका सम्पूर्णा जीवनपद्धतिरस्ति । अनया साकं केन प्रकारेण ग्रामीणार्थव्यवस्थायाः आत्मनिर्भरतायाः च दर्शनं संयुक्तमस्ति - इति कृत्वा ब्राउनः अमुना अतितरां प्रभावितः । इतः एव ब्राउनः निरणैषीत् यदसौ मेक्सिकोदेशं गत्वा खादिकार्याणि आरप्स्यते। सः, मेक्सिको-देशस्य ओहाका-ग्रामे ग्रामीणान् खादिकार्याणि अशिक्षयत्, तान् प्रशिक्षितवान्, तथा चाद्य 'ओहाका-खादी' -ति एकं विशिष्टं मानकं सञ्जातम् । अस्याः कार्ययोजनायाः अन्तर्जालीय-वाहिकायां लिखितमस्ति - 'The Symbol of Dharma

in Motion' | अस्याम् अन्तर्जालीय-वाहिकायां 'मार्कोस'- इत्यस्य अतिशयं रुचिकरः साक्षात्कारः अपि प्राप्स्यते । असौ कथयति यत् आरम्भे जनाः खादिविषये सन्दिग्धाः आसन्, परन्तु अन्ततोगत्वा, अस्मिन् जनानां रुचिः एधिता तथा चास्य विपणी सन्नद्धा । असौ कथयति यत् एतानि राम-राज्य-सम्बद्धानि वृत्तानि सन्ति। यदा भवान् जनानाम् आवश्यकताः पूरयति, तदा जनाः अपि भवद्भिः साकं संयोक्तुम् आरभन्ते ।

सखायः! देहलीस्थे 'Cannuaght place'- इत्याख्ये स्थाने खादि-विपणीतः गान्धिजयन्त्यवसरे एकस्मिन् एव दिवसे एककोटितोऽ-प्यधिकमुद्रात्मकः विक्रयः अभवत् । एवमेव कोरोना-संङ्क्रमणकाले खादिनिर्मिताः मुखनासिकाच्छादकाः अपि लोकप्रियाः जायमानाः सन्ति । देशे बहुत्र स्वयंसेविसंस्थाः अन्यसंस्थाः च खादिवस्त्रस्य मुखनासिकाच्छादकानां निर्माणं कुर्वन्त्यः सन्ति। उत्तरप्रदेशे बाराबंकी-जनपदस्य एका महिला अस्ति – सुमनदेवीमहोदया । सुमन-महोदयया स्वयंसेवीसमूहस्य महिलाभिः सह खादि-विनिर्मितं मुखनासिकाच्छादका -नां निर्माणं कृतम् । शनैः शनैः तया सह अन्याः अपि महिलाः सम्मिलिताः । सम्प्रति एताः सहस्राधिकसंख्याकान् मुखनासिकाच्छाद- कान् निर्मान्ति । अस्माकं स्थानीयोत्पादानां वैशिष्ट्यं भवति यत् तेषां पृष्ठे समग्रम् एकं दर्शनं भवति ।

मम प्रियाः देशवासिनः, वयं यदा आत्मीयानि वस्तूनि प्रति गर्वमनुभवामः तर्हि संसारेऽपि तेषु जिज्ञासा अभिवर्धते । यथाऽस्माकं अध्यात्मयोगेन आयुर्वेदेन चाखिलविश्वम् आकर्षितम्, तथैवानेकाः क्रीडाः संसारमाकर्षयन्ति । अद्यत्वेऽस्माकं मलखम्बोऽपि नैकेषु देशेषु प्रचलति। अमेरिकायां चिन्मय-पाटणकरः प्रज्ञा-पाटणकरश्च यदा स्वीयगृहे मलखम्ब-प्रशिक्षणम् आरभताम् तदा ताभ्यां चिन्तितमपि नासीद् यदेषः एतावत्साफल्यम् अधिगमिष्यति । अमेरिकायामद्यत्वे नैकेषु स्थानेषु मलखम्बप्रशिक्षणकेन्द्राणि प्रचलन्ति। बहवः अमेरिकी-देशीयाः युवानः मलखम्बमनुबोधयन्ति। अपरञ्चापि,

जर्मनी-पोलेण्ड- मलेशियादिषु विंशतिमितेषु देशेषु मलखम्बः सुप्रचारितः जातः।साम्प्रत -मस्य विश्वविजेतृ-स्पर्धा आयोज्यते यस्यां नैकदेशानां प्रतिभागिनः सहभागिनो भवन्ति। भारते तु प्राचीनकालादेव ईदृशाः क्रीडाः प्रचलिताः अभवन्, याभिरस्माकं असाधारणं विकासमजायत। एताभिरस्माकं शरीर-मानसयोः सन्तोलनं विकसति । सम्भवतः अस्माकं युवसन्ततिषु मलखम्बस्य प्रचारः नास्ति । भवन्तः अन्तर्जालोपरि अन्वेषणं कुर्वन्तु, अस्यानन्दं चाऽनुभवन्तु ।

सखायः, अस्माकं देशे नैकानि योद्धृकौशलानि सन्ति येषां विषये वयं अभिज्ञाः अपि नास्मः । अहमिच्छामि यदस्माकं युव- मित्राणि एतेषां विषये जानन्तु, तेषामभ्यासं कुर्वन्तु, समयानुसारं च तेषु नवाचारमपि कुर्वन्तु । जीवने यदा समाह्वानं न भवति, तदा व्यक्तित्वस्य सर्वश्रेष्ठपक्षोऽपि नैवोद्भवति। एतेन भवन्तः सर्वदाऽत्मानं समाह्वयन्तु ।

मम प्रियाः देशवासिनः, कथ्यते यत् शिक्षणं हि वर्धनं भवति इति । अद्य मनोगते अहम् एकेन अद्भुतव्यक्तित्वेन सह भवतां परिचयं कारयामि । एषः पठनाधिगमनयोः प्रसन्न्तौत्सुक्यं धत्ते । असौ अस्ति - पोन-मरियप्पनः । एषः तमिलनाडुराज्यस्य तुतुकुडी- स्थाने निवसति । तुतुकुडीस्थानं Pearl City इति मौक्तिक-नगरत्वेन प्रसिद्धम् । पुरा एतत् पाण्डियन्-साम्राज्यस्य महत्वपूर्णं केन्द्रम् आसीत् ।

अत्रत्यः निवासी मम मित्रं पोन-मरियप्पनः केशकर्तनकर्मणि निरत: अस्ति, अथ एकं केशकर्तनालयं प्रचालयति । अनेन अत्यन्तं उत्कृष्टं प्रेरणादायकं च कार्यं कृतम् । स्वीये केशकर्तनालये पुस्तका- लयः विनिर्मितः । व्यक्तिः यदि स्वीय-केशकर्तन-क्रमस्य प्रतीक्षां कुर्वन् तत्र किञ्चिद् अधीते, अधीतं च लिखति तर्हि तस्मै निर्धारित- मूल्ये अपचिति: प्रदीयते ।

आगच्छन्तु तुतुकुड़ीं चलामः – पोन-मरियप्पन-महोदयेन सह सम्वादं कुर्मः -

प्रधानमन्त्री - पोन-मरियप्पन-महोदय! नमस्कारः ।

पोन-मरियप्पन: - माननीय! प्रधानमन्त्रिवर्य! वणक्कम् ।

प्रधानमन्त्री - वणक्कम्, वणक्कम् । एषः पुस्तकालय-सम्बद्धः विचारः कथम् आगतः?

पोन-मरियप्पनः – अहम् अष्टमकक्षापर्यन्तं पठितवान् । पारिवारिक-परिस्थितयः समीचीनाः न आसन्, अतः अध्ययनं नानुवृत्तम् । अधीतान् च दृष्टवा मनसि मे हीनभावना आगच्छति स्म । अतः पुस्तकालयं स्थापयामि इति चिन्तितवान्, अनेन बहवः लाभान्विताः भविष्यन्ति, इयमेव मम प्रेरणा अजायत ।

प्रधानमन्त्री - भवते किं पुस्तकं रोचते?

पोन-मरियप्पनः — मह्यं "तिरूकुरूल" इति बहु रोचते ।

प्रधानमन्त्री — भवता सह सम्भाष्य प्रसन्नताम् अनुभवामि । नैकाः शुभकामनाः ।

पोन-मरिप्पनः — अहम् अपि माननीयेन प्रधानमन्त्रिणा सह सम्वादं कुर्वन् अतिप्रसन्नताम् अनुभवामि ।

प्रधानमन्त्री – अनेकाः शुभकामनाः ।

पोन मरियप्पनः – धन्यवाद- प्रधानमन्त्री महोदय ।

प्रधानमन्त्री – धन्यवादः ।

सम्प्रति पोन-मरियप्पन-महोदयेन सह सम्वादः कृतः । पश्यन्तु, कथं सः केशप्रसाधनेन सह जीवनं प्रसाधयितुम् अवसरं प्रकल्पयति ।

सखायः, एतद् ज्ञात्वा भवन्तः आनन्दम् अनुभविष्यन्ति यत् भारते एतादृशाः नैके जनाः सन्ति ये ज्ञानप्रसारणार्थं जीवन्ति, ज्ञान- प्रसारणेन च अपारं हर्षम् अनुभवन्ति । एते प्रतिदिनं अन्यान् पठितुं प्रेरयन्ति । मध्यप्रदेशस्य सिंगरौलीतः एका शिक्षिका उषादुबे-वर्या यया Scooty-इति यानं सचलपुस्तकालयरूपेण परिवर्तितम् । सा प्रतिदिनं अटन्ती सचलपुस्तकालयेन सह कञ्चिदपि ग्रामं प्राप्य बालान् बालाः च पाठयति । बालाः तां 'किताबोंवाली दीदी'इति पुस्तकालयभगिनीति एवं सम्बोधयन्ति । वर्षेऽस्मिन् ओगस्टमासे अरुणाचलप्रदेशस्य निरजुली-इत्यस्य Rayo -ग्रामे स्वयंसेवि-पुस्तकालयः सम्वृत्तः । वस्तुतः अतत्यमीना-गुरुंगः, अथ च, दिवांग-होसाई-इत्युभाभ्यां यदा ज्ञातं यत् उपनगरं पुस्तकालयः नास्ति, तदा धनसाहाय्यार्थम् एतौ अग्रे आगतौ

। अस्मिन् सदस्यता-शुल्कं नास्ति इति ज्ञात्वा आश्चर्यान्विताः भविष्यन्ति भवन्तः । यः कोऽपि सप्ताह-द्वयार्थं पुस्तकं नेतुं शक्नोति, तदनन्तरं च तत् प्रत्यर्पणीयं भवति ।

एषः पुस्तकालय: सर्वदा उद्घाटितः भवति । पुस्तकालयं परितः निवसन्तः अभिभावकाः अनेन प्रसन्ना: भवन्ति यत् तेषां बालाः पुस्तकाध्ययने प्रवृत्ता: भवन्ति । विशेषरुपेण तदा, यदा विद्यालयाः  अपि ऑन्लाइन्-कक्षाः आरब्धवन्तः । तत्रैव चण्डीगढे एकं संघटनं चालयता सन्दीपकुमारेण एकस्मिन् mini van-इति लघुयाने सचलपुस्तकालयः निर्मितः । अनेन प्रकल्पेन निर्धनेभ्यः बालेभ्यः पुस्तकानि निःशुल्कं प्रदीयन्ते ।

अनेन सहैव गुजरातस्य भावनगरस्य संस्थयोः विषये अपि जानामि। तयोः प्रथमा अस्ति - विकास-वर्तुल-ट्रस्ट-इति । एषा संस्था प्रतियोगि-परीक्षासम्बद्ध-छात्राणां सहायतां करोति । १९७५-वर्षतः कार्यं कुर्वन्ती एषा संस्था ५०००-पुस्तकैः सह १४०-तः अधिका: पत्रिकाः उपलब्धाः कारयति । अपरा संस्था 'पुस्तकपरब' इति वर्तते । इयं नवाचारयुक्ता योजना वर्तते | या साहित्यपुस्तकैः सह अन्यपुस्तकानि निश्शुल्कम् उपलब्धानि कारयति ।

अस्मिन् पुस्तकालये आध्यात्मिक-आयुर्वेदिक-उपचार- सम्बन्धीनि पुस्तकानि अपि सन्ति । यदि भवन्त: अपि एतादृशानां प्रयासानां विषये जानन्ति तर्हि संचारमाध्यमेषु प्रसारयितुम् आग्रहं करोति । एतानि उदाहरणानि पुस्तकाध्ययन-पर्यन्तं पुस्तकाल- योद्घाटनपर्यन्तं न सीमितानि । अपितु नवभारतस्य भावनाया: प्रतीकानि सन्ति। समाजस्य विभिन्ना: जना: विभिन्नेषु क्षेत्रेषु नवाचारम् आचरन्त: सन्ति। श्रीमद्-भगवद्-गीतायां अपि उक्तम् - 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।' अर्थात् ज्ञानम् इव जगति किमपि पवित्रं नास्ति । अहं ज्ञानस्य प्रसारणकर्तॄन् महानुभावान् च हृदा अभिनन्दानि।

मम प्रियाः देशवासिनः, अनतिचिरमेव सरदारवल्लभभाई- पटेलवर्यस्य जन्मजयन्तीम् ओक्टोम्बरमासस्य ३१-दिनाङ्के राष्ट्रिय- एकतादिवसरूपेण आचरिष्यामः । मनोगते पूर्वम् अपि सरदारपटेल- वर्यस्य विषये विस्तरेण चर्चितम् । तस्य विराट्व्यक्तितत्त्वस्य विविधाः आयामाः चर्चिताः । न्यूनाः एव तादृशाः सन्ति येषां व्यक्तितत्त्वे वैचारिकता नैतिकसाहसः राजनीतिविलक्षणता

कृषिक्षेत्रज्ञानं राष्ट्रियैक्यसमर्पणं चेत्यादीनि भवन्ति । किम् भवन्तः जानन्ति पटेलवर्यस्य प्रत्युत्पन्नमतिम्? कल्पयन्तु लौहपुरूषं यः राजपुरुषैः सह वार्तामकरोत्, पूज्यबापूवर्यस्य जनान्दोलनस्य प्रबन्धमकरोत्, आंग्लैः सह युद्धमपि अकरोत्, सर्वमेतद् कुर्वन्नपि तस्य प्रत्युत्तपन्नमतिः सदा जागृता भवति स्म । गांधिवर्येण सरदारपटेलविषये उक्तमासीत् । तस्य विनोदपूर्णाः वार्ताः श्रुत्त्वा अतिहासः भवति स्म । एतच्च दिवसे एकवारं न अपितु बहुवारं भवति स्म । अत्रापि पठनयोग्यः विषयः अस्ति अस्माकं कृते । कियती वा समस्या भवतु मतिः यदि जागृता भवति तर्हि समाधानं कर्तुं सामर्थ्यं भवति । सरदारवर्येण एतदेव कृतमासीत् ।

मम प्रियाः देशवासिनः सरदारपटेलवर्येण स्वकीयं पूर्णं जीवन राष्ट्रैक्याय समर्पितम् आसीत् । तेन भारतीयाः स्वतन्त्रतान्दोलनेन सह योजिताः । स्वातन्त्र्येण सह कृषक सम्बद्धान् विषयान् योजितवान् । विभिन्नराज्यपरिवारान् सम्पत्तीः च राष्ट्रेण सह योजनस्य कार्यं कृतवान् । विविधतासु एकता इति मन्त्रं प्रत्येकं भारतीयस्य मनसि जागरयन् आसीत्।

सखायः, अद्य अस्माकं वाणी, अस्माकं व्यवहारः अस्माकं कर्म च प्रतिक्षणं अग्रे वर्धनीयम्। येन वयं एकीभूय समस्तनागरिकेषु आत्मभावम् उत्पादयितुं प्रभवामः। अस्माकं पूर्वजैः एतादृशाः प्रयासाः विहिताः । अवलोकयन्तु केरले लब्धजन्मना पूज्येन आदिशंकराचार्येण भारतस्य चर्तुषु दिक्षु चत्वारः महत्वपूर्णाः मठाः स्थापिताः। उत्तरे बद्रिकाश्रमः, पूर्वे पुरी, दक्षिणे शृङ्गेरी, पश्चिमे द्वारिका च । तेन श्रीनगरस्य यात्रा अपि कृता । इदमेव कारणम् यत् तत्र एकस्य पर्वतस्य नाम 'शंकराचार्य hill' अपि अस्ति । तीर्थाटनं भारतम् एकसूत्रे आबध्नाति । ज्योतिर्लिंगानां शक्तिपीठानां च शृंखला भारतम् एकसूत्रे आबध्नाति । त्रिपुरातः गुजरातपर्यन्तं जम्मूकाश्मीरतः तमिलनाडुपर्यन्तं स्थितानि आस्थाकेन्द्राणि अस्मान् एकीकुर्वन्ति। भक्ति-आन्दोलनं षष्ठ–सप्तम-शताब्द्यां प्रथमवारं तमिलभाषायां प्रारब्धम् आसीत् । अनन्तरं च कन्नड्-इत्यादिभाषाषु अपि इदम् आन्दोलनं प्रवृतम् । अनन्तरं समग्रेऽपि भारते बृहज्जनान्दोलनरूपेण संवृत्तम् । एतेन किल भक्तिमाध्यमेन वयम् एकीभूताः अभवाम ।

अस्माकं नित्यजीवने अपि ऐक्यस्य विषयाः सम्मिश्रिताः सञ्जाताः। प्रत्येकम् अनुष्ठानात् पूर्वं विभिन्नानां नदीनाम् आवाहनं क्रियते । एतस्मिन् सुदूरे उत्तरे सिन्धुनदीत: दक्षिणे भारतजीवन- दायिनी कावेरी नदी सम्मिलिता अस्ति । प्रायः अस्माकं परम्परायां स्नानसमये पवित्रभावेन ऐक्यमन्त्रः उच्चार्यते -

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु-कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

एवंप्रकारेण सिक्खमतावलम्बिनां पवित्रस्थलेषु नान्देड़साहिब-पटनासाहिब-इत्युभौ गुरुद्वारौ स्तः । अस्माकं सिक्खगुरुभिः अपि स्वजीवनेन सत्कार्यैः च ऐक्यभावना सुदृढीकृता । विगतशताब्द्याम् अस्माकं देशे डॉ.बाबासाहेब-अम्बेडकर-सदृशाः महान्तः विभूतिजनाः उपातिष्ठन्, यै: वयं सम्विधानमाध्यमेन संयोजिताः एकीकृताश्च ।

सखायः! संघ: शक्तिः, संघ: सामर्थ्यम्, संघः प्रवर्तनम्, संघ: अभिवर्धनम्, संघटिताः वयं नवशिखराणि प्राप्स्यामः । वस्तुत: एतादृश्यः अपि शक्तयः आसन्, याभि: अस्माकं मनस्सु सन्देह- बीजारोपणस्य प्रयासः कृतः, विभाजनप्रयासः च कृतः । परं देशेन सर्वदा सम्यक् प्रत्युत्तरं प्रदत्तम् । निरन्तरं स्व-नावीन्येन, प्रेम्णा प्रयासै: कर्मभिः च 'एकं भारतं श्रेष्ठं भारतम्' इत्यत्र नववर्णाः अन्वेषणीयाः स्थापनीयाश्च । एकतायाः नववर्णाः पूरणीयाः, अथ प्रत्येकं नागरिकेण पूरणीयम् । सन्दर्भेऽस्मिन् अहम् एकं जालपुटं द्रष्टुं निवेदयामि - ekbharat.gov.in - अस्मिन् राष्ट्रियैकीकरण- प्रवर्धनप्रयासा: परिलक्षिताः सन्ति । विशिष्टः एक प्रकल्पः अत्र वर्तते- 'अद्यतनं वाक्यम्'- इति । अस्मिन् प्रकल्पे वयं प्रतिदिनं एकं वाक्यं स्थापयामः, तत् वाक्यं विभिन्नासु भाषासु कथं वदामः इति पठितुं शक्नुवन्ति । भवन्तः अस्य जालपुटस्य कृते सहयोगम् अपि कुर्वन्तु, यथा- प्रत्येकं राज्यं तस्य संस्कृतौ च विभिन्नानि भोज्यानि भवन्ति, एतानि व्यञ्जनानि स्थानीयसामग्रीभिः निर्मीयन्ते । किं वयम् एतेषां व्यञ्जनानां पाकविधिं स्थानीय-सामग्रीनाम्ना सह जालपुटे स्थापयितुं शक्नुमः? सङ्घं रोगप्रतिरोधक-क्षमताः च सम्वर्धयितुम् इतः उत्तमः उपायः कः स्यात्?

सखायः! एतन्मासस्य एकत्रिंशद्दिनांके 'केवड़िया'-इति ऐतिहासिके 'Statue of Unity'-स्थले नैककार्यक्रमेषु सहभागितायाः अवसरः लब्धः । भवन्तः अपि तत्र युक्ताः भवन्तु ।

मम प्रियाः देशवासिनः, ऑक्टोबरमासस्य एकत्रिंशत्तमे अह्नि वयं वाल्मीकिजयन्तीमपि आयोजयिष्यामः । अहं भगवते वाल्मीकये नमामि, अस्मिन् विशिष्टावसरे च देशवासिभ्यः हार्दिकशुभकामनाः व्याहरामि। महर्षिवाल्मीकेः महान्तः विचाराः कोटि-कोटि-जनान् प्रेरयन्ति, शक्तिमतः च कुर्वन्ति। एते हि लक्षेभ्यः कोटिभ्यश्च निर्धनदलितेभ्यः महदाशारूपाः सन्ति, तेष्वाश्वासनं विश्वासं चापि संचारयन्ति। असौ व्याहरत् यद्यदि मानुषे इच्छा-शक्तिः सक्रियास्ति तर्ह्यसौ यत्किमपि कार्यं सरलतया कर्तुं पारयति। एषा हि इच्छाशक्तिरेवास्ति या युवजनेषु असाधारण-कार्य-सम्पादनस्य क्षमतां प्रापयति ।

महर्षिवाल्मीकिः सकारात्मकविचाराणां समर्थकोऽवर्तत, तस्य कृते सेवायाः मानवीय-गरिम्णश्च स्थानं सर्वोपरि वर्तते । महर्षि- वाल्मीकेः आचाराः विचाराः आदर्शाश्च 'न्यू-इंडिया' -इत्यस्य कृते अस्मदीय-संकल्पानां प्रेरणाः दिशानिर्देशाश्च सन्ति। वयं महर्षि- वाल्मीकिं प्रति सर्वदैव कृतज्ञाः स्थास्यामः यत् तेन अनागत-वंशानां मार्गदर्शनार्थं रामायणसदृशः महान्ग्रन्थो विरचितः।

ऑक्टोबरमासे एकत्रिंशत्तमे दिने भारतस्य पूर्वप्रधानमन्त्री श्रीमती इन्दिरागान्धी दिवंगता। अहं तस्यै सादरं श्रद्धांजलिं समर्पयामि।

मम प्रियाः देशवासिनः, साम्प्रतं काश्मीरस्य पुलवामाक्षेत्रं अखिलभारतस्य शिक्षणपरिदृश्ये महत्त्वाधायिनीं भूमिकां निर्वहति । अद्याशेषदेशे विद्यार्थिनः यद्गृहकार्यं कुर्वन्ति, आलेखं वा लिखन्ति; तेषां सम्पादने पुलवामावासिनां कठोर-परिश्रमः महद्योगदानं करोति। काश्मीरोपत्यका देशस्य प्रतिशतं नवतिमितं 'पेन्सिल्'- इति ईषिकाणाम् आवश्यकतां पूरयति, तत्र पुलवामाक्षेत्रस्य योगदानं महत्तरं वर्तते। किंचित्कालपूर्वं भारतम् ईषिकाकाष्ठानां आयातं करोति स्म; परमद्य पुलवामाक्षेत्रस्य योगदानेन देशमस्मिन्सन्दर्भे आत्मनिर्भरं सञ्जातम् । वस्तुतः पुलवामाक्षेत्रस्य ईषिका-लेखनपट्टानि राज्यानाम्

अन्तर्भेदमपि पूरयति। उपत्यकायाः चिनारकाष्ठेषु पर्याप्तं संक्लेदं मार्दवं चावाप्येते ये हि ईषिका-निर्माणाय सर्वथापेक्षिते स्तः। पुलवामाक्षेत्रे उक्खूक्षेत्रं तु विशेषतया ईषिका-ग्रामत्वेन अभिज्ञायते। अत्र ईषिका-निर्माणस्य बहवः एकांशाः सन्ति येषु पर्याप्ताजीविका- वसराः समुपलब्धाः, येभ्यः प्रभूतसंख्यायां महिलाः वृत्यर्जनं कुर्वन्ति।

सखायः, पुलवामाक्षेत्रस्य एतदभिज्ञानं तदैव स्थापितं यदाऽत्रत्यैः निवासिभिः नवाचारः प्रकल्पितः, तस्यानुपालनाय चात्मा समर्पितः । एतेष्वेव कर्मठजनेषु मंजूर-अहमद-अलाई अन्यतमः अस्ति। पूर्वं मंजूरः सामान्य-काष्ठछेदकः श्रमिकः आसीत्। असौ किमपि नूतनं कर्तुमैच्छत येन तस्य वंशजाः निर्धनाः न स्युः। तेन स्वीय-पैतृकभूमिं विक्रीय सेवफलानां सम्पुट-पेटिकानां निर्माणैकांशः स्थापितः। अनन्तरं तेन ज्ञातं यत् ईषिका-निर्माणेऽपि चिनारकाष्ठस्योपयोगः सम्भाव्यते। तदा तेन केषाञ्चन विख्यातानाम् ईषिका-निर्मातॄणां कृते चिनारकाष्ठ-पेटिकानाम् आपूर्तिः आरब्धा। एतेन तस्य आयः भूयशः अभिवर्धितः। अनन्तरं तेन स्वीयानि ईषिकावरण-निर्माणोपकरणानि क्रीतानि, ख्यातेभ्यश्च समवायेभ्यः ईषिकावरणानां विक्रयः आरब्धः। अद्य मंजूर-महोदयस्य वार्षिको व्यवसायः कोट्यधिक-रूप्यकात्मकः संजातः, असौ च प्रायशः द्विशतजनेभ्यः वृत्तिमपि उपपादयति। अद्य 'मनोगतम्'-इत्यस्य माध्यमेन समस्त-देशवासिनां पक्षतः अहं मंजूरमहाभागाय, पुलवामाक्षेत्रस्य परिश्रमनिरतेभ्यः भगिनी-भ्रातृभ्यः, तेषां परिवारजनेभ्यश्च बहुशः प्रशंसां व्याहरामि यद्भवन्तः देशस्य युवजनानां शिक्षायै बहुमूल्यं योगदानं क्रियमाणाः सन्ति।

मम प्रियाः देशवासिनः, संचाररोधकाले अस्माकं देशे प्रविध्याधारित-सेवानां प्रदानस्याभिनवाः प्रयोगाः आचरिताः। साम्प्रतमस्य कृते अतिविकसितानां प्राविधिक-संभार-तन्त्राणां वाऽवश्यकता न भवति। झारखण्डे एतत्कार्यं महिलानामेकेन स्वयंसहायि-समूहेन सम्पादितमस्ति। एताभिः महिलाभिः कृषकाणां क्षेत्रेभ्यः शाकाः फलानि च नीत्वा गृहेषु परिदत्तानि। एतस्य कृते

ताभिः ‘आजीविका-फार्मफ्रैश्’ इति नामकम् ‘एप्’ इति माध्यमं कारितं येन जनाः सरलतया शाकफलानां अभियाचनं कर्तुं शक्नुवन्ति । एतेन प्रयासेन कृषकेभ्यः स्वीय-शाकफलानां उचितमूल्यं अधिगतं जनाश्च आवर्षं अभ्यग्र-खाद्यानां सेवनं कर्तुमपारयन्। ‘आजीविका-फार्मफ्रैश्’ इति माध्यमं तत्र बहुविख्यातं जातम् । संचाररोधकाले एतत्माध्यमेन पंचाशत्लक्षरूप्यकाणां व्यापारः सम्पादितः।

सखायः, कृषिक्षेत्रे नूतनसम्भावनाभिः बहवो युवानः अत्रोन्मुखाः जाताः। मध्यप्रदेशस्य बड़वानीक्षेत्रे अतुल-पाटीदारेण चतुस्सहस्र-कृषकाः प्रविध्या संयोजिताः। एते कृषकाः अतुल-पाटीदारस्य ‘ई-प्लेटफॉर्म’ -कृषिपटलेन उर्वरक-बीज-कीटनाशकानां ऊर्वंग-नाशकानां च स्वीयावश्य- कवस्तूनां गृहापूर्तिमधिगच्छन्ति। एतेन प्राविधिकमाध्यमेन आधुनिककृषि-उपकरणान्यपि भाटकाधारेण उपलब्धानि भवन्ति। संचाररोधकाले एतेन माध्यमेन कृषकेभ्यः सहस्रशः पुटकानि प्रापितानि येषु शाकानां, कार्पासादीनां बीजान्य प्यासन् । अतुलमहाभागः तस्य दलं च कृषकान् प्रविधिविषयेषु अभिज्ञानमपि कुरुतः, येन ते ‘ऑनलाइन्’ -इति सद्यस्कमाध्यमैः क्रयविक्रयं कर्तुं पारयन्ति ।

सखायः, विगतदिनेषु महाराष्ट्रस्यैकया घटनया ममावधानमाकर्षितम्। तत्रैकेन कृष्युत्पादसमवायेन कृषकेभ्यः मक्केति धान्यं क्रीतं, मूल्याधिकं लाभांशः चापि दत्तः। समवायः यदाऽस्य कारणविषये पृष्टः तदोत्तरितं यद्भारतसर्वकारेण ये नूतनकृषिविधयः घोषिताः तेषामनुसारेण कृषकाः भारते यत्र कुत्रापि स्वीयोत्पादं विक्रेतुं पारयन्ति, पर्याप्तमूल्यं चापि लब्धुमर्हन्ति । एतेन तैः चिन्तितं एतदधिमूल्यं कृषकैः सम्भाजनीयमिति । अस्योपरि तेषामपि अधिकारः इति कृत्वा तैः कृषकेभ्यः अधिलाभः सम्भाजितः।

मित्राणि! एतदधिलाभस्तु सीमितः परमयम् आरम्भः महत्तरः। एतेन ज्ञायते यन्नूतनैः कृषिनियमैः आधारस्तरे कृषकाणां जीवन- परिवर्तनस्य बहव्यः सम्भावनाः समाविष्टाः सन्ति।

मम प्रियाः देशवासिनः, अद्य मनोगते देशवासिनां असाधारणोपलब्धीनां, देशस्य, संस्कृतेश्च विविधायामेषु भवद्भिः सम्भाषणस्यावसरः अधिगतः। अस्माकं देशः प्रतिभापूर्णः अस्ति। यदि भवन्तः अपि एतादृग्जनानां विषये जानन्ति तर्हि तान् आधृत्य चर्चां कुर्वन्तु, लिखन्तु, तेषां साफल्यं च प्रसारयन्तु। समागतानां पर्वणां कृते भवद्भ्यः सपरिवारं बहुशः शुभकामनाः। परमेतेषु अवसरेषु अवश्यं स्मरन्तु यन्मुखाच्छादनं अवश्यमेव धारणीयम्, हस्तप्रक्षालनं फेनकेन कर्तव्यम्, हस्तद्वयमितं च सामाजिकान्तरालं परिपालनीयमिति।

सखायः, आगामिनि मासे मनोगतमित्यस्य माध्यमेन पुनः भवद्भिः सम्भाषिष्ये । बहुशः धन्यवादाः।

ooo

[भाषान्तरं – डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com